यामत्रये याते निम्नगाया ह्रदाय वा। स्नानं कुर्य्यात् संभ्रान्तः शक्तिमदुपचारतः। देवान् पितॄंश्च सन्तर्प्य ततो देवगृहं व्रजेत्। तत्रस्थां पूजयेद्देवीं पुष्पैस्तत्कालसम्भवैः। फलानि च यथालाभं विरूढं धान्यसञ्चयम्। ततः सुवासिनी पूज्या कुङ्कुमैः कुसुमेन च। भोजयेन्मधुरान्नेन प्रणिपत्य विसर्जयेत्। ततस्तु तण्डुलप्रस्थं घृतपात्रेण संयुतम्। ब्राह्मणाय प्रदातव्यं श्रीर्मे प्रीयतामिति। निर्वर्त्यैतद्विशेषेण ततो भुञ्जीत वाग्यतः। मासानुमासं कर्त्तव्यं विधिनानेन भारत!। श्रीर्लक्ष्मीः कमला सम्पत् पद्मा नारायणी तथा। पद्मा धृतिः स्थितिः पुष्टिस्तुष्टिः सिद्धिः क्षमा क्रमात्। मासानुमासं राजेन्द्र! प्रीयतामिति कीर्त्तयेत्। वस्त्रमण्डपिकां कृत्वा पुष्पगन्धादिवासिताम्। शय्यायां स्थापयेल्लक्ष्मीं सर्वोपस्करसंयुताम्। सौभाग्याष्टकसंयुक्तां नेत्रपट्टावृतस्तनीम्। सप्तधान्यसमोपेतां रसधातुसमन्विताम्। पादुकोपानच्छत्रभाजनासनसंस्कृताम्। देवीं संपूज्य विधिवद् ब्राह्मणाय कुटुम्बिने। व्यासाय देवविदुषे यस्मै वा रोचते स्वयम्। सोपस्करां सवत्साञ्च धेनुं दत्त्वा क्षमापयेत्। यः पञ्चमीव्रतमिदं दयितं सुरारेर्भक्त्या समाचरति पूज्य खगोत्तनूजाम्। राज्यश्रियं स भुवि भव्यजनोपभोग्यं भुङ्क्त्वा प्रयाति भवनं मधुसूदनस्य। माहात्म्यमपि वक्ष्यामि पञ्चम्यास्तव भारत!। जयेति या च विख्याता व्रतिनां जयदायिनी। यस्माज्जया जयाशब्दं करोति व्रतिनो बुधाः!। परिपूर्णं व्रतं यस्यां सा ज्ञेया जयपञ्चमी। जया च विजया चैव जयन्ती पापनाशिनी"। जया, कार्त्तिकशुक्लपञ्चमी "श्रवणेन यदा युक्ता शुक्लपक्षे तु पञ्चमी। उत्तराफाल्गुनी यस्मिन्दुवारसमागमः। आरभेत नरस्तस्यां व्रतं पूर्व्वमुपोषितः। चतुर्थ्यामेकभक्ताशी ब्रह्मचारी जितेन्द्रियः। धृतिमान् कृतसंकल्पो भवेन्नियमवासरः। ततःकल्यं समुत्थाय स्नात्वा नियतमानसः। घृतसक्तुमया पत्न्या कुर्य्याद् बिल्वस्य चार्चनम्। बिल्वमूले ततः कुर्य्याद् वेदिं पुष्पाक्षतैर्युताम्। स्थापयेत् कलशानष्टौ तस्यामष्टसु दिक्षु वा। तन्मध्ये बिल्वमूले तु स्थापयेच्च महाघटम्। सौवर्णं राजतं ताम्रं मार्त्तिकं वा शुभान्वितम्" इत्यादि।

श्रीप्राप्तिव्रतं विष्णुधर्मोत्तरोक्तं "श्रीविहीनस्य लोकेऽस्मिन् जीवितस्यापि किं फलम्। तस्मादुव्रतं समाचक्ष्व येन स्याच्छ्रीयुतो नरः"। मार्कण्डेय उवाच "वैशाख्यां समतीतायां प्रतिपत्प्रभृति क्रमात्। पूर्ववत् पूजयेद्देवं श्रीधरार्यं दिने दिने"। पूर्ववदिति चैत्रादिरूपावाप्तिव्रतवत्। "पुष्पमूलैः फलैश्चैव जुहुयादक्षतानि च। बिल्वांश्च वह्नौ सततं गोरसैर्भोजयेद् द्विजान्। त्रिरात्रोपोषितो ज्यैष्ठ्यां कनकं प्रतिपादयेत्। वस्त्रयुग्मञ्च राजेन्द्र! तेन साफल्यमश्नुते। कृत्वा व्रतं मासमिदं यथोक्तमासाद्य मार्गं सुचिरं मनुष्यः। मनुष्यमासाद्य विशुद्धतेजाः श्रिया युतः स्याज्जगति प्रधानम्"।

श्रीवृक्षनवमीव्रतं भविष्योत्तरे "तस्माद्भाद्रपदे चैव शुक्लपक्षे कुरूद्वह!। नवम्यामर्चयेद्भक्त्या ईषत्सूर्योदयेऽनघ!। श्रीवृक्षं विविधैरन्नैरग्निपतितैः फलैः। तिलपिष्टान्नगोधूमैर्धूपगन्धानुलेपनैः। ईशस्त्रानुकराक्रान्त! श्रीतरो वै नमस्तुते। मन्त्रेणानेन राजेन्द्र! पूजयेद्भक्तिसंयुतः। सप्तकृत्वस्ततोऽभ्यर्च्य श्रीवृक्षं प्रणिपत्य च। ब्राह्मणान् भोजयेद्भक्त्या श्रीदेवी प्रीयतां मम। ततो भुञ्जीत मौनेन तैलाहारविवर्जितम्। अनग्निपक्वं सत्पात्रे दधिधान्यफलं शुभम्। एवं यः कुरुते पार्थ! श्रीवृक्षाभ्यर्चनं नरः। नारी वा दुःखशोकाभ्यां मुच्यते नात्र संशयः"।

श्रीव्रतं विष्णुधर्मोत्तरे "चैत्रशुक्लस्य पञ्चम्यां पूजयित्वा तथा श्रियम्। सकलैवाप्नुयादेतत् फलं संवत्सरोदितम्"। "अथातः संप्रवक्ष्यामि श्रीव्रतं नाम ते व्रतम्। चैत्रशुक्लतृतीयायां स्नानमभ्यङ्गपूर्वकम्। कृत्वा शुक्लाम्बरो राजन् शुक्लमाल्यानुलेपनः। तिष्ठेद् घृतोदनाहारो भूमौ सुप्यान्निशां च ताम्। चतुर्थ्याञ्च तथा स्नानं बहिरेव समाचरेत्। पञ्चम्याञ्च विशेषेण शुक्लाम्बरधरः शुचिः। लक्ष्मीं संपूजयेत् पद्मैः कृतकेऽकृतकेऽपि वा। शुक्लेन गन्धमाल्येन घृतदीपेन वाप्यथ" इत्यादि।

षष्ठीव्रतं ब्रह्मपु० "कृतोपवासः पञ्चम्यां षष्ठ्यां योऽर्चयते रविम्। नियमव्रतचारी च रवेर्भक्तिसमन्वितः। सप्तम्यां वा महाभाग! सोऽश्वमेधफलं लभेत्"। विष्णुधर्मोत्तरे "षष्ठ्याञ्च शुक्लपक्षस्य ये नरा भौमवासरे। व्रतञ्चरन्ति यत्नेन तथा तासां पृथक् पृथक्। न तेषां दुर्लभं किञ्चित् भविष्यति सुरोत्तम!। द्वियोगे द्विगुणं तेषां फलं स्कन्द! भविष्यति। त्रियोगे पूजनं कृत्वा मासेषु सुरसत्तम!। अक्षय्यं जायते पुण्यं नात्र कार्य्या विचारणा"।

संवत्सरव्रतं विष्णुधर्मोत्तरे "इदमन्यत् प्रवक्ष्यामि पञ्च-